| | | |
|---|---|---|
| Any large aquatic animal, a sea-monster 3. | 1 2 3<br>अन्तर्जलचरं सत्त्वं क्रूरं यादोऽभिधीयते । | |
| A shark 2. | 1 2 1 2<br>अवहारः स्मृतो ग्राहः कुम्भीरो नक्र उच्यते ॥ | A crocodile 2. |
| A tortoise 3. | 1 2 3 1<br>कच्छपः कमठः कूर्मस्तद्भार्या च डुली स्मृता ॥६५६॥ | The female tortoise. |
| | a 1 2 3 4 5 6<br>वैसारिणो विसारः पृथुरोमा जलचरो झषो मत्स्यः । | |
| A fish 11. | 7 8 9 10 11<br>तिमिरनिमिषश्च मीनः शकली शल्की च विज्ञेयः ॥६५७॥ | |
| A sort of fish 2. | 1 2 b 1 2<br>सहस्रदंष्ट्रः पाठीनः प्रोष्ठी च शफरी स्मृता । | |
| A shrimp or prawn; a sort of fish 2. | 1 2 1 2<br>नलमीनश्चिलिचिमः कुलीरः कर्कटो मतः ॥६५८॥ | A crab 2. |
| Which are large, a sort of fish. | 1 2 3 4 5 c 6 d<br>शालः शकुलः कुलिशो राजीवो रोहितश्च पल्लवकः । | |
| | 7 e 8 9 10<br>शृङ्गीमद्गुरवागुसनन्द्यावर्तादयो महामत्स्याः ॥६५९॥ | |
| A kind of sea-animal, a crocodile, a shark 2. | 1 2 1<br>मत्स्यविशेषो मकरः करिमकरो भवति तद्विशेषस्तु । | A fabulous sea-monster. |
| A sort of large fish. | f 1 2 3<br>चीरिल्लितिमितिमिङ्गिलगिलादयो महामत्स्याः ॥६६०॥ | |
| Having recently come out of a small egg, also a shoal of fish, a multitude of fish 2. | 1 2 g<br>क्षुद्राण्डो मत्स्यसंघातः पोताधानं च कथ्यते । | |
| A worm 2. | 1 2 h 1 i 2<br>गण्डूपदः किञ्चुलको जलौकाः स्युर्जलौकसः ॥६६१॥ | A leech 2. |
| A frog 8. | 1 2 3 4 5 6<br>मण्डूकः प्लवको भेकः शालूरो दर्दुरो हरिः । | |
| | 7 8 1<br>प्लवङ्गमः प्लवगः स्याद्वर्षाभूस्तद्वधूः स्मृता ॥६६२॥ | The female frog. |
| | यावन्तो दृश्यन्ते नरकरितुरगादयः स्थले जीवाः । | |
| | j<br>तावन्तः सलिलेष्वपि जलपूर्वास्ते तु विज्ञेयाः ॥६६३॥ | |
| A pearl 3. | 1 2 3<br>उक्ता मुक्ता मौक्तिकं शौक्तिकेयं , | |
| Pearl-oyster 2. | 1 2<br>मुक्तास्फोटः शुक्तिराख्यायते च । | |

a वैसारणो, वैशारणो b प्रौष्ठी c लोहितश्च
d पल्लपिकः e मद्गुरु f चिरिल्लि g पोतादानं
h कंचुलको, किंजलको i जलौकाश्च, जलोकसः,
जलोकाः स्युः j तेऽपि ।